उत्तर प्रदेश बेसिक शिक्षा परिषद्

संस्कृत पीयूषम्

(कक्षा 4)

E-BOOKS DEVELOPED BY

1. Dr.Sanjay Sinha Director SCERT,U.P,Lucknow
2. Ajay Kumar Singh J.D.SSA,SCERT,Lucknow
3. Alpa Nigam (H.T) Primary Model School, Tilauli Sardarnagar,Gorakhpur
4. Amit Sharma (A.T) U.P.S, Mahatwani ,Nawabganj, Unnao
5. Anita Vishwakarma (A.T) Primary School ,Saidpur,Pilibhit
6. Anubhav Yadav (A.T) P.S.Gulariya,Hilauli,Unnao
7. Anupam Choudhary (A.T) P.S,Naurangabad,Sahaswan,Budaun
8. Ashutosh Anand Awasthi (A.T) U.P.S,Miyanganj,Barabanki
9. Deepak Kushwaha (A.T) U.P.S,Gazaffarnagar,Hasanganz,unnao
10. Firoz Khan (A.T) P.S,Chidawak,Gulaothi,Bulandshahr
11. Gaurav Singh (A.T) U.P.S,Fatehpur Mathia,Haswa,Fatehpur
12. Hritik Verma (A.T) P.S.Sangramkheda,Hilauli,Unnao
13. Maneesh Pratap Singh (A.T) P.S.Premnagar,Fatehpur
14. Nitin Kumar Pandey (A.T) P.S, Madhyanagar, Gilaula , Shravasti
15. Pranesh Bhushan Mishra (A.T) U.P.S,Patha,Mahroni Lalitpur
16. Prashant Chaudhary (A.T) P.S.Rawana,Jalilpur,Bijnor
17. Rajeev Kumar Sahu (A.T) U.P.S.Saraigokul, Dhanpatganz ,Sultanpur

वन्दना

त्वमेव माता च पिता त्वमेव,

त्वमेव बन्धुश्च सखा त्वमेव।

त्वमेव विद्या द्रविणं त्वमेव,

त्वमेव सर्वं मम देवदेव।

सर्वे भवन्तु सुखिनः,

सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु,

मा कश्चिद् दुःखभाग् भवेत्।

निर्देश-

अध्यापक उपर्युक्त स्वदेश वन्दना का सस्वर पाठ कराएँ।

शब्दार्थाः

एतादृशम्- ऐसे, पुनाति-पवित्र करती है,

रेवापि- (रेवा+अपि) नर्मदा भी, त्रिवर्णम्-तिरंगा।

प्रथमः पाठः

क्रियाप्रयोगः

गजः चलति।

गजौ चलतः।

गजाः चलन्ति।

छात्रा लिखति।

छात्रे लिखतः।

छात्राः लिखन्ति।

शशकः तृणं खादति।

शशकौ तृणं खादतः।

शशकाः तृणं खादन्ति।

बालिका कमलं पश्यति।

बालिके कमलं पश्यतः।

बालिकाः कमलं पश्यन्ति।

अभ्यासः

मौखिकः

१.निम्नलिखित वाक्य पढ़िए-

गजः चलति, गजौ चलतः, गजाः चलन्ति। छात्रा लिखति, छात्रे लिखतः, छात्राः लिखन्ति। बालिका कमलं पश्यति, बालिके कमलं पश्यतः, बालिकाः कमलं

पश्यन्ति।

२.निम्नलिखित क्रियाओं की धातुएँ बताइए-

चलति, लिखति, खादति

लिखित:

१.रिक्त स्थानों की पूर्ति कीजिए-

(क)----------- **चलत:।**

(ख)----------- **लिखन्ति।**

(ग) ----------- **खादत:।**

(घ)----------- **पश्यन्ति।**

२.निम्नलिखित शब्दों में से उपयुक्त क्रिया चुनकर चित्र के सामने लिखिए-

खादति, तिष्ठति, धावति, गर्जति।

(क) **शशक:** -----

(ख) **अश्व:** -----

(ग) *सिंहः* -----

(घ) *कुक्कुरः* -----

३.अध्यापक छात्रों से अकारान्त पुंल्लिङ्ग शब्दों की सूची बनवाएँ।

शब्दार्थाः

गजः-एक हाथी, गजौ-दो हाथी, गजाः- बहुत से हाथी, चलति-चलता है, लिखति-लिखता है, पश्यति-देखता है।

प्रोजेक्ट कार्य- ***शिक्षक छात्र-छात्राओं से चार्ट पर कुछ पशु-पक्षियों के चित्र चिपकवाकर उनके सम्मुख संस्कृत नाम लिखवाएँ तथा कक्षा में टाँगे।***

द्वितीयः पाठः

सर्वनामप्रयोगः

अयं बालकः हसति।

इमौ बालकौ हसतः।

इमे बालकाः हसन्ति।

इयं चटका कूजति।

इमे चटके कूजतः।

इमाः चटकाः कूजन्ति।

इदं फलम् अस्ति।

इमे फले स्त:।

इमानि फलानि सन्ति।

अभ्यास:

मौखिक:

१.निम्नलिखित वाक्यों को पढ़िए-

(क)अयं बालक: हसति।

(ख)इमौ बालकौ हसत:।

(ग)इमे बालका: हसन्ति।

(घ)इयं चटका कूजति।

(ङ)इमे चटके कूजत:।

(च)इमा: चटका: कूजन्ति।

२.निम्नलिखित प्रश्नों के उत्तर दीजिए-

(क)कौ हसत:?

(ख)का: कूजन्ति।

लिखित:

१.उचित सर्वनाम शब्दों द्वारा रिक्त स्थानों की पूर्ति कीजिए-

(क) ----------- अश्वा: चलन्ति।

(ख) ----------- बालकौ पठत:।

(ग) ----------- बालिका: लिखन्ति।

(घ) ----------- बालिके हसत: ।

(ङ) ----------- पत्राणि सन्ति।

२.'इदम्' शब्द के पुंल्ंिलङ्ग, स्त्रीलिङ्ग एवं नपुंसकलिङ्ग के प्रथमा एवं द्वितीया विभक्ति के रूप लिखिए।

शब्दार्था:

अयं- यह, चटका- गौरैया, अस्ति- है, हसति- हँसता है।

प्रोजेक्ट कार्य- पाठ में आए सर्वनाम पदों को छाँटकर लिखिए।

तृतीयः पाठः

अस्मद्, युष्मद्

अहं फलं खादामि।

आवां फलं खादावः।

वयं फलं खादामः।

त्वं चित्रं पश्यसि।

युवां चित्रं पश्यथः।

यूयं चित्रं पश्यथ।

अहं गुरुं नमामि।

आवां गुरुं नमावः।

वयं गुरुं नमामः।

अभ्यासः

मौखिकः

१.अहं, आवां, वयं, त्वं, युवां, यूयं शब्दों को विभिन्न क्रियाओं के साथ प्रयोग करते हुए वाक्य बनाइए।

लिखितः

२.रिक्त स्थानों की पूर्ति कीजिए-

(क)----------- पुस्तकं पठावः।

(ख)-------- पत्रं लिखसि।

(ग)----------- गृहं गच्छामः।

(घ)-------- फलं खादथः।

शब्दार्थः

अहं-मैं, आवां- हम दोनों, वयं- हम सब, त्वं-तुम, युवां- तुम दोनों, यूयं- तुम सब।

चतुर्थः पाठः

अव्ययशब्दाः (अपि, किम्, अधुना, एव, कुत्र, सदा, च, प्रातः, सायं)

एषः मयूरः अस्ति।

मयूरः नृत्यति।

मयूरः तृणम् अपि खादति।

एषः शुकः अस्ति।

शुकः आकाशे उत्पतति।

अधुना शुकः किं करोति?

अधुना सः वृक्षे एव तिष्ठति।

एषः कः?

एषः मत्स्यः अस्ति।

मत्स्यः कुत्र वसति?

मत्स्यः सदा जले एव वसति।

एषा का?

एषा गौः।

सा तृणानि अन्नानि च खादति।

सा प्रातः सायं च दुग्धं ददाति।

अभ्यासः

मौखिकः

१.निम्नलिखित वाक्यों को सही-सही पढ़िए-

मयूरः नृत्यति। मयूरः तृणम् अपि खादति। शुकः वृक्षे एव तिष्ठति। मत्स्यः जले एव वसति। गौः तृणानि अन्नानि च खादति।

२.निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए-

(क)मयूरः किं खादति?

(ख)शुकः कुत्र उत्पतति?

(ग)गौः किं ददाति?

लिखितः

१.पाठगत अव्यय शब्दों की सूची बनाइए।

२.रिक्त स्थानों की पूर्ति कीजिए-

(क)मयूरः ----------- खादति।

(ख)------- शुकः किं करोति?

(ग) मत्स्यः ----------- जले एव वसति।

(घ)सा ----------- अन्नानि च खादति।

शब्दार्थाः

अपि-भी, कुत्र-कहाँ, किम्-क्या, एव-ही, सदा- हमेशा।

प्रोजेक्ट कार्य- पाठ में आए हुए अव्यय शब्दों की सूची बनाइए।

पंचमः पाठः

बालगीतम्

चटका ब्रूते चूँ चूँ चूँ।

वदति कुक्कुटः कुकड़ूँ कूँ ।

वदति कोकिलः कुहू कुहू।

हर्षयामो मुहुः मुहुः।

शिखिनः वाणी केका केका।

टर्र-टर्र कुरुते मण्डूकः।

बालो विहसति हा हा हा।

काकः प्रलपति का का का।

वदति कुक्कुरो भौं भौं भौं।

वदति वानरः खौं खौं खौं।

निर्देश-

छात्र उपर्युक्त बालगीत का सस्वर वाचन करें।

अभ्यासः

मौखिकः

१.रिक्त स्थानों की पूर्ति कीजिए-

(क)चटका ब्रूते ---------।

(ख)शिखिनः वाणी ----------।

(ग)काकः प्रलपति -----------।

(घ)वदति वानरः -----------।

शब्दार्थाः

चटका- गौरैया,ब्रूते- बोलती है, कुक्कुटः-मुर्गा, कोकिलः -कोयल, हर्षं यामो- (यामः) हम सब प्रसन्न होते हैं।, मुहुः मुहुः- बार-बार, शिखिनः वाणी- मोर की बोली, कुरुते- करते हैं, मण्डूकः - मेढक, विहसति- हँसता है, प्रलपति- बोलता है, कुक्कुरः- कुत्ता, वानरः- बन्दर।

षष्ठः पाठः

बुद्धिबलम्

एकस्मिन् वने एक: सिंह: आसीत्।

स प्रतिदिनं पशूनां वधं करोति स्म।

एकदा एकस्य शशकस्य वार: आयात:।

स: विलम्बेन सिंहस्य समीपम् अगच्छत्।

विलम्बात् सिंह: क्रुद्ध: अभवत्, विलम्बस्य च कारणम् अपृच्छत्।

शशक: अवदत्, अन्य: सिंह: मार्गे तस्य अवरोधम् अकरोत्।

क्रुद्ध: सिंह: शशकेन सह अन्यं सिंहं द्रष्टुम् अगच्छत्।

शशक: तम् एकस्य कूपस्य समीपम् अनयत्।

सिंह: अपृच्छत्, "कुत्र अन्य: सिंह:?"

बुद्धिमान् शशक: अवदत्, "स: कूपे अस्ति।"

यदा सिंहः कूपे स्वप्रतिबिम्बम् अपश्यत् तदा सः कूपे अकूर्दत् मृतः च।

अतः साधूक्तम्- ''बुद्धिर्यस्य बलं तस्य।''

अभ्यासः

मौखिकः

१.उपर्युक्त कहानी को अपने शब्दों में सुनाइए।

लिखितः

२.निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए-

क. ंिसिंहः कुत्र आसीत्?

ख. सिंहः किम् अकरोत्?

ग. शशकः विलम्बस्य किं कारणम् अवदत्?

घ.शशकः सिंहं कुत्र अनयत्?

३.संस्कृत में अनुवाद कीजिए-

(क)बालक पढ़ता है।

(ख)वह खाता है।

(ग)वे हँसते हैं।

(घ)राधा खेलती है।

शब्दार्थाः

वारः-बारी, आयातः - आयी, अवरोधम्-रुकावट, कूपस्य - कुएँ के, प्रतिबिम्बं-परछाई को, अकूर्दत्-कूद गया, साधूक्तम् (साधु+उक्तम्) - ठीक कहा गया है।

सप्तमः पाठः

बाल-क्रीडा

कन्दुकेन क्रीडन्ति बालकाः।

पश्य, पश्य, क्रीडन्ति बालकाः।

इदं कन्दुकं गुरुणा दत्तम्,

मह्यं तु क्रीडार्थम्।

अपसर, अपसर अत्र न तिष्ठ,

गच्छ त्वं पठनार्थम्।

शिशु-छात्रं कथयन्ति बालकाः। कन्दुकेन।

हस्ताघातं पादाघातम्,

वहति कन्दुकं मृदुलम्।

कश्चित् खेलति एकः एकः,

कश्चित् कूर्दति सकुलम्।

नहि कलहं कुर्वन्ति बालकाः। कन्दुकेन।

शब्दार्थाः

अपसर-दूर हटो।

हस्ताघातम्-हाथों का आघात।

मृदुलम्-कोमल।

एकःएकः-अकेले-अकेले।

सकुलम्-समूह के साथ।

निर्देश- छात्र बालगीत का सस्वर वाचन करें।

अभ्यासः

१.निम्नलिखित प्रश्नों के उत्तर दीजिए-

(क)कन्दुकं केन दत्तम्?

(ख)बालकाः शिशु-छात्रं किं कथयन्ति?

(ग)कन्दुकं किं वहति?

(घ)बालकाः किं न कुर्वन्ति?

अष्टमः पाठः

स्वतंत्रता-दिवसः

राष्ट्रियदिवसेषु स्वतंत्रतादिवसः मुख्यः अस्ति। अस्मिन् एव दिवसे अस्माकं देशः स्वतंत्रः अभवत्। स्वतन्त्रतादिवसे देशस्य प्रधानमंत्री त्रिवर्णं ध्वजम् आरोहयति। सर्वे छात्राः स्वच्छं वस्त्रं परिधाय विद्यालयं गच्छन्ति। तत्र प्रधानाचार्यः ध्वजारोहणं करोति। छात्राः राष्ट्रगानं गायन्ति। अन्ते मिष्टान्नवितरणं भवति। मिष्टान्नं भुक्त्वा छात्राः हर्षपूर्वकं स्वगृहं गच्छन्ति।

अभ्यासः

मौखिकः

१.निम्नलिखित प्रश्नों के उत्तर बताइए-

(क)स्वतंत्रतादिवसे कः ध्वजं आरोहयति?(ख)छात्राः किं गायन्ति?

(ग)अन्ते किं वितरणं भवति?

लिखितः

२.रिक्त स्थानों की पूर्ति कीजिए-

क.अस्मिन् दिवसे ----------- त्रिवर्णं ------- आरोहयति।

ख.विद्यालये ----------- ध्वजारोहणं करोति।

ग.अन्ते मिष्टान्नवितरणं-----------।

घ. मिष्टान्नं भुक्त्वा छात्राः -----------स्वगृहं गच्छन्ति।

शब्दार्थाः

त्रिवर्णम्- तिरंगा, ध्वजम्- झण्डे को, परिधाय-धारण करके; मिष्टान्नं- मिठाई को, भुक्त्वा- खाकर।

प्रोजेक्ट कार्य- चार्ट पर तिरंगे झण्डे का चित्र बनाइए तथा तीनों रंगों का नाम उसके सम्मुख लिखिए।

नवमः पाठः

परोपकारः

एक: व्याघ्र: एकं वृक्षम् अकथयत् -

रे वृक्ष! त्वं अचल: अक्षम: च असि।

वृक्ष: अकथयत्- रे व्याघ्र! त्वम् अन्यान् निरपराधान् जीवान् मारयसि। अहं तु स्वफलै: अन्यान् जीवान् पालयामि। त्वं हिंसां करोषि। हिंसा महत् पापम्। अहिंसा महत् पुण्यम्। इति श्रुत्वा व्याघ्र: वृक्षम् अकथयत्- वस्तुत: त्वं धन्य: असि।

अभ्यास:

मौखिक:

१.नीचे लिखे शब्दांे को पढ़िए-

अस्मि, मारयसि, पालयामि, असि, वृक्षम्, अन्यान्, जीवान्।

२.''व्याघ्र: शब्द की तरह निम्नलिखित शब्दों में विसर्ग लगाकर पुंल्लिङ्ग शब्द बनाइए-

गज, मृग, अश्व, काक, शशक, वानर।

लिखितः

१.रिक्त स्थानों की पूर्ति कीजिए-

क.एक: व्याघ्र: एकं -----------अकथयत्।

ख.अहं -----------अस्मि।

ग.अहं तु स्वफलै: अन्यान् -----------पालयामि।

शब्दार्थाः

निरपराधान् = बिना अपराध के, श्रुत्वा = सुनकर।

दशमः पाठः

शरीरस्य अंगानि

केशः, ललाटम्, कर्णः, नेत्रम्, नासिका, मुखम्, दन्ताः, ग्रीवा, करः, अंगुलिः, उदरम्, कटिः, चरणः ।

निर्देश-

उपर्युक्त दिये गये शब्दों में से शरीर के अंगों के तीर के सामने उनके सही नाम लिखिए।

अभ्यासः

१.चित्रों और शब्दों के सही जोड़े बनाइए-

उदरम्

ग्रीवा

ललाटम्

कटिः

शब्दार्थाः

केशः= बाल, ललाटम् =माथा, कर्णः=कान, नेत्रम्=आँख, नासिका=नाक, दन्ताः- दाँत, ग्रीवा=गर्दन, अंगुलिः=अंगुली, उदरम् = पेट, कटिः = कमर, करः- हाथ, चरणः- पैर

अध्यापक के लिए- शरीर के सभी अंग पुंल्लिङ्ग में नहीं होते कुछ स्त्रीलिङ्ग और कुछ नपुंसकंलिङ्ग में होते हैं।

अभ्यासः

मौखिकः

१.संकेत से कोई अंग दिखाकर उसकी संस्कृत पूछी जाए।

लिखितः

३.अलग-अलग लिङ्गों में आए हुए अंगों की सारिणी बनवाएँ-

पुं0	स्त्री.	नपुं.
केशः	ग्रीवा	ललाटम्
कर्णः	नासिका	मुखम्

एकादश: पाठः

होलिकोत्सवः

भारतवर्षे अनेके उत्सवाः सन्ति। तेषु उत्सवेषु होलिकोत्सवः प्रमुखः। अयम् उत्सवः फाल्गुनमासे पूर्णिमायां भवति। जनाः बालकाश्च अन्येषाम् उपरि वर्णमिश्रितं जलं क्षिपन्ति। ततः ते अबीरगुलालादिकैः सह परस्परं मिलन्ति। अस्मिन् दिने जनाः गृहे-गृहे नानाविधानि मिष्टान्नानि पचन्ति।

अस्मिन् दिने जनाः वैरं विहाय परस्परं मैत्रीपूर्णं व्यवहारं कुर्वन्ति। एवम् इदं पर्वं राष्ट्रस्य एकतायाः सौहार्दस्य च प्रतीकम्।

अभ्यासः

मौखिकः

१.अधोलिखित प्रश्नों के उत्तर दीजिए-

अ. उत्सवेषु कः प्रमुखः अस्ति ?

आ. होलिकोत्सव: कदा भवति ?

२.होली के विषय में तीन वाक्य संस्कृत में बताइए ।

लिखित:

३.रिक्त स्थानों की पूर्ति कीजिए-

क. भारतवर्षे अनेके------- सन्ति।

ख.इदं पर्वं राष्ट्रस्य एकताया: -------च प्रतीकम्।

शब्दार्था:

पूर्णिमायां- पूर्णिमा में, परस्परं- आपस में , पचन्ति- पकाते हैं, सौहार्दस्य-मित्रता का।

द्वादशः पाठः

सूक्तयः

१. आचारः परमो धर्मः।

२. विद्याधनं सर्वधनप्रधानम्।

३. विद्या ददाति विनयम्।

4. शीलं परं भूषणम्।

5. धर्मेण लभते सर्वम्।

6. श्रद्धावान् लभते ज्ञानम्।

7. परोपकाराय सतां विभूतयः।

8. सत्यमेव जयते नानृतम्।

9. माता शत्रुः पिता वैरी येन बालो न पाठितः।

१0. दुर्जनःपरिहर्तव्यः।

अभ्यासः

१. सूक्तियों को कण्ठस्थ कीजिए।

२. सूक्ति क्रमांक २ व 4 का अर्थ लिखिए।

शब्दार्थाः

सत्यमेव (सत्यम्+एव) -सत्य ही, नानृतम्- न अनृतम् (झूठ नहीं)

परिहर्तव्यः- त्याग

देना चाहिए।

त्रयोदशः पाठः

शिष्टाचारः

अध्यापकः कक्षां प्रविशति।

छात्राः उत्तिष्ठन्ति तं प्रणमन्ति च।

अध्यापकस्य निर्देशेन ते स्वासनम् उपविशन्ति। शिक्षकः तान् पाठयति। ते ध्यानेन पठन्ति।

पूर्णावकाशे अध्यापकं प्रणम्य गृहं गच्छन्ति।

अभ्यासः

मौखिकः

१. प्रश्नों के उत्तर दीजिए-

अ. कः कक्षां प्रविशति?

ब. अध्यापकं के प्रणमन्ति?

स. कः पाठयति?

लिखितः

२.रिक्त स्थानों की पूर्ति कीजिए-

क.अध्यापकस्य --------- स्वासनम् उपविशन्ति।

ख.ते --------- पठन्ति।

ग.अध्यापकं प्रणम्य --------- गच्छन्ति।

३.अधोलिखित वाक्यों का संस्कृत में अनुवाद कीजिए-

क.वह पुस्तक पढ़ता है।

ख.हम सब फल खाते हैं।

ग.राम विद्यालय जाता है।

शब्दार्थाः

शिष्ट +आचारः = शिष्टाचारः - अच्छे लोगों का आचरण, प्रणमन्ति-प्रणाम करते हैं।
स्व+ आसनं = स्वासनम्-अपने आसन पर, उपविशन्ति- बैठते हैं।

चतुर्दशः पाठः

आदर्शः परिवारः

अहम् एकम् अशिक्षितं परिवारम् अपश्यम्।

तत्र बहवः सदस्याः आसन्।

तत्र भोजनाय पर्याप्तम् अन्नम् अपि नासीत्।

अतएव ते दुःखिता: आसन्।

अस्माकं परिवारः शिक्षितः। अयं सीमितः परिवारः अस्ति।

इदानीम् अस्माकं परिवारे अहं, मम भगिनी, मम जननी, पितामही, मम जनकः, पितामहः च, सन्ति।

सर्वे हृष्टपुष्टशरीराः प्रसन्नाः च सन्ति।

अभ्यासः

मौखिकः

१.रिक्त स्थानों की पूर्ति कीजिए-

क.अहं एकम्--------- परिवारम् अपश्यम्।

ख.मम परिवारः ----------अस्ति।

२. "जननी" तथा "भगिनी" की भाँति ई से अन्त होने वाले स्त्रीलिङ्ग के चार शब्द बताइए।

(अध्यापक सहायता करें)

लिखित:

३. निम्नलिखित प्रश्नों के उत्तर लिखिए-

क. अहं कीदृशम् परिवारम् अपश्यम् ?ख. के दुःखिताः आसन्?

शब्दार्था:

अपश्यम्-मैंने देखा, आसन्-थे। नासीत् (न+ आसीत्)-नहीं था।

दृष्ट्वा-देखकर। हृष्टपुष्टशरीराः -स्वस्थ शरीर वाले।

पञ्चदशः पाठः

सदाचारः

रात्रौ शीघ्रं शयनीयम्।

प्रातः खलु जागरणीयम्।

अप्रियवचनं त्यजनीयम्।

भद्रं भद्रं करणीयम्।

मातृवन्दनं करणीयम्।

पितृवन्दनं करणीयम्।

गुरोःवन्दनं करणीयम्।

अतिथिवन्दनं करणीयम्।

अभ्यासः

मौखिकः

१.उपर्युक्त कविता का सस्वर पाठ करें।

लिखितः

१. रिक्त स्थानों की पूर्ति कीजिए-

क. -----------त्यजनीयम्।

ख. रात्रौ शीघ्रं -----------।

शब्दार्थाः

रात्रौ-रात्रि में। शयनीयम्-सोना चाहिए। खलु- अवश्य, त्यजनीयम्-त्यागना चाहिए।

षोडशः पाठः

वृक्षारोपणम्

अयं वर्षाकालः। सर्वे जनाः यत्र तत्र वृक्षारोपणं कुर्वन्ति। मम विद्यालये अपि अद्य वृक्षारोपणकार्यम् अस्ति।

तत्र केचन छात्राः विद्यालयस्य उद्यानं गच्छन्ति।

अपरे वृक्षांकुरान् आरोपयन्ति। केचन आलवालं रचयन्ति।

अध्यापकः तेषाम् साहाय्यं करोति। स्वकार्यं दृष्ट्वा सर्वे प्रसन्नाः भवन्ति।

अभ्यासः

मौखिकः

१.निम्नलिखित प्रश्नों के उत्तर दीजिए-

अ.उद्यानं के गच्छन्ति?

ब.अपरे किं कुर्वन्ति?

स.किं दृष्ट्वा सर्वे प्रसन्ना: भवन्ति?

लिखित:

२.पाठ में प्रयुक्त क्रियाओं को छाँटकर लिखिए- (अध्यापक सहायता करें)

३.पाठगत अव्यय पदों की सूची बनाइए।

शब्दार्था:

केचन- कुछ, वृक्षांकुरान्- वृक्ष+अंकुरान्-पेड़ के अंकुरों को, आरोपयन्ति-लगाते हैं, आलवालं- थाला

परिशिष्ट (व्याकरण)

भाषा मनुष्य के भावों एवं विचारों के आदान-प्रदान का साधन है। व्याकरण का भाषा से घनिष्ठ सम्बन्ध है। व्याकरण का अर्थ है, भाषा की सार्थक इकाई 'शब्द' के प्रकृति-प्रत्ययादि का विवेचन। वस्तुतः व्याकरण ही शब्दों का शुद्ध उच्चारण सिखाता है। प्रकृति- प्रत्ययादि का बोध कराकर उनके शुद्ध रूप एवं सही अर्थ के प्रयोग का ज्ञान कराता है।

संस्कृत भारत की प्राचीनतम भाषा है। इसे देववाणी भी कहते हैं। भाषा में बहुत सी ध्वनियाँ होती हैं। ध्वनियों को प्रकट करने के लिए भाषा में कुछ चिह्न मान लिये जाते हैं। ये चिह्न अलग-अलग भाषाओं में अलग-अलग होते हैं। इन्हीं चिह्नों को वर्ण (अक्षर) कहते हैं।

वर्ण

वर्ण दो प्रकार के होते हैं- स्वर तथा व्यंजन। अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, लृ, ए, ऐ, ओ, औ स्वर हैं तथा क से ह तक व्यंजन। क्ष, त्र तथा ज्ञ, ये संयुक्त व्यंजन हैं। वर्णों का उच्चारण मुख के विभिन्न स्थानों जैसे- कंठ, तालु, मूर्धा, दन्त, ओष्ठ और नासिका से होता है।

लिङ्ग और वचन

लिङ्ग- संस्कृत में संज्ञा एवं सर्वनाम शब्दों का तीन लिङ्गों में प्रयोग होता है- पुंल्लिङ्ग, नपुंसकलिङ्ग और स्त्रीलिङ्ग। उदाहरणार्थ- बालक पुंल्लिङ्ग है, बालिका स्त्रीलिङ्ग तथा पुष्प नपुंसकलिङ्ग है।

वचन- संस्कृत में एकवचन, द्विवचन तथा बहुवचन होते हैं जैसे एकवचन में बालकः द्विवचन में बालकौ तथा बहुवचन मे बालकाः ।

क्रिया

क्रिया की दशा (काल) बताने के लिए लकारों का प्रयोग किया जाता है। वर्तमान काल के लिए लट्लकार का प्रयोग किया जाता है, जैसे पठति (पढ़ता है), भूतकाल के लिए

लङ् लकार का प्रयोग किया जाता है, जैसे- अपठत् (पढ़ा) तथा भविष्य काल के लिए लृट्लकार का प्रयोग किया जाता है। जैसे पठिष्यति (पढ़ेगा)। आज्ञार्थक वाक्यों में लोट् लकार का प्रयोग किया जाता है जैसे- पठतु (पढ़ें)।

हर लकार में क्रिया के तीन पुरुष होते हैं तथा प्रत्येक पुरुष में तीन वचन होते हैं। संस्कृत की क्रियाओं में लिङ्ग-सूचक अन्तर नहीं होते। जैसे 'पठति' का अर्थ 'पढ़ता है' तथा 'पढ़ती है' दोनों होगा।

विशेषण

संस्कृत भाषा में विशेषणों के लिङ्ग, वचन एवं विभक्ति अपने विशेष्य के अनुसार होते हैं। जैसे- सुन्दरः बालकः, सुन्दरी नगरी, सुन्दरं पुष्पम् आदि।

अव्यय

जिन शब्दों का कोई लिङ्ग. वचन, विभक्ति नहीं होती है, उन्हें अव्यय शब्द कहते हैं। इनका रूप भी एक समान बना रहता है।

कुछ उपयोगी अव्यय निम्नलिखित हैं:-

एव - ही,

अधुना - अब, इस समय

प्रातः -सबेरे

सायम् - सायंकाल

अपि - भी

पुनः - फिर

यत्र - जहाँ

कुत्र - कहाँ

यदा - जब

तदा - तब

कदा - कब

सदा - हमेशा

शब्द रूप

अकारान्त पुंल्लिङ्ग

'बालक' - लड़का

विभक्ति:	एकवचन	द्विवचन	बहुवचन
प्रथमा	बालक:	बालकौ	बालका:
द्वितीया	बालकम्	बालकौ	बालकान्
तृतीया	बालकेन	बालकाभ्याम्	बालकै:
चतुर्थी	बालकाय	बालकाभ्याम्	बालकेभ्य:
पंचमी	बालकात्	बालकाभ्याम्	बालकेभ्य:
षष्ठी	बालकस्य	बालकयो:	बालकानाम्
सप्तमी	बालके	बालकयो:	बालकेषु
सम्बोधन	हे बालक!	हे बालकौ!	हे बालका:

नोट: इसी प्रकार गज (हाथी), शशक (खरगोश), मयूर (मोर) के भी शब्द रूप चलते हैं। मयूर शब्द के रूप में 'न' के स्थान पर 'ण' होगा जैसे 'मयूरेण', मयूराणाम्। ये परिवर्तन तृतीया एकवचन तथा षष्ठी के बहुवचन में होते हैं।

आकारान्त स्त्रीलिङ्ग

'बालिका' - लड़की

विभक्ति:	एकवचन	द्विवचन	बहुवचन
प्रथमा	बालिका	बालिके	बालिका:
द्वितीया	बालिकाम्	बालिके	बालिका:

तृतीया	बालिकया	बालिकाभ्याम्	बालिकाभिः
चतुर्थी	बालिकायै	बालिकाभ्याम्	बालिकाभ्यः
पंचमी	बालिकायाः	बालिकाभ्याम्	बालिकाभ्यः
षष्ठी	बालिकायाः	बालिकयोः	बालिकानाम्
सप्तमी	बालिकायाम्	बालिकयोः	बालिकासु
सम्बोधन	हे बालिके!	हे बालिके!	हे बालिकाः

नोट- इसी प्रकार चटका, (गौरैया) छात्रा आदि के भी शब्द रूप चलते हैं। 'छात्रा' शब्द के रूप में 'न' के स्थान पर 'ण' होगा, जैसे- छात्राणाम्।

अकारान्त नपुंसकलिङ्ग

जल (पानी)

विभक्तिः	एकवचन	द्विवचन	बहुवचन
प्रथमा	जलम्	जले	जलानि
द्वितीया	जलम्	जले	जलानि
तृतीया	जलेन	जलाभ्याम्	जलैः
चतुर्थी	जलाय	जलाभ्याम्	जलेभ्यः
पंचमी	जलात्	जलाभ्याम्	जलेभ्यः
षष्ठी	जलस्य	जलयोः	जलानाम्
सप्तमी	जले	जलयोः	जलेषु
सम्बोधन	हे जलम् !	हे जले!	हे जलानि!

नोटः जल के समान ही कमल, पत्र तथा फल आदि शब्दों के रूप चलेंगे।

पात्र, पत्र, छत्र, मित्र के रूपों में 'न' के स्थान पर 'ण' होगा जैसेः पत्राणि, पत्रेण, पत्राणाम् आदि।

तद्- (वह)

पुंल्लिङ्ग

विभक्तिः	एकवचन	द्विवचन	बहुवचन

प्रथमा	सः	तौ	ते
द्वितीया	तम्	तौ	तान्
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पंचमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

तद्- (वह)

स्त्रीलिङ्ग

विभक्तिः	एकवचन	द्विवचन	बहुवचन
प्रथमा	सा	ते	ताः
द्वितीया	ताम्	ते	ताः
तृतीया	तया	ताभ्याम्	ताभिः
चतुर्थी	तस्यै	ताभ्याम्	ताभ्यः
पंचमी	तस्याः	ताभ्याम्	ताभ्यः
षष्ठी	तस्याः	तयोः	तासाम्
सप्तमी	तस्याम्	तयोः	तासु

नपुंसकलिङ्ग

विभक्तिः	एकवचन	द्विवचन	बहुवचन
प्रथमा	तत्	ते	तानि
द्वितीया	तत्	ते	तानि

नोटः- शेष रूप पुंल्लिङ्ग के समान ही होते हैं।

इदम्-(यह)

पुंल्लिङ्ग

विभक्तिः	एकवचन	द्विवचन	बहुवचन
प्रथमा	अयम्	इमौ	इमे
द्वितीया	इमम्	इमौ	इमान्
तृतीया	अनेन	आभ्याम्	एभिः
चतुर्थी	अस्मै	आभ्याम्	एभ्यः
पंचमी	अस्मात्	आभ्याम्	एभ्यः
षष्ठी	अस्य	अनयोः	एषाम्
सप्तमी	अस्मिन्	अनयोः	एषु

स्त्रीलिङ्ग

विभक्तिः	एकवचन	द्विवचन	बहुवचन
प्रथमा	इयम्	इमे	इमाः
द्वितीया	इमाम्	इमे	इमाः
तृतीया	अनया	आभ्याम्	आभिः
चतुर्थी	अस्यै	आभ्याम्	आभ्यः
पंचमी	अस्याः	आभ्याम्	आभ्यः
षष्ठी	अस्याः	अनयोः	आसाम्
सप्तमी	अस्याम्	अनयोः	आसु

नपुंसकलिङ्ग

विभक्तिः	एकवचन	द्विवचन	बहुवचन
प्रथमा	इदम्	इमे	इमानि
द्वितीया	इदम्	इमे	इमानि
तृतीया	अनेन	आभ्याम्	एभिः
चतुर्थी	अस्मै	आभ्याम्	एभ्यः
पंचमी	अस्मात्	आभ्याम्	एभ्यः
षष्ठी	अस्य	अनयोः	एषाम्
सप्तमी	अस्मिन्	अनयोः	एषु

धातु रूप

पठ्-पढ़ना

लट् लकार (वर्तमान काल)

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	पठति	पठतः	पठन्ति
मध्यम पुरुष	पठसि	पठथः	पठथ
उत्तम पुरुष	पठामि	पठावः	पठामः

लङ् लकार (भूतकाल)

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	अपठत्	अपठताम्	अपठन्
मध्यम पुरुष	अपठः	अपठतम्	अपठत
उत्तम पुरुष	अपठम्	अपठाव	अपठाम

गम्- (जाना)

लट् लकार (वर्तमान काल)

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	गच्छति	गच्छतः	गच्छन्ति
मध्यम पुरुष	गच्छसि	गच्छथः	गच्छथ
उत्तम पुरुष	गच्छामि	गच्छावः	गच्छामः

लङ् लकार (भूतकाल)

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	अगच्छत्	अगच्छताम्	अगच्छन्
मध्यम पुरुष	अगच्छः	अगच्छतम्	अगच्छत

उत्तम पुरुष	अगच्छम्	अगच्छाव	अगच्छाम

नोट- इसी प्रकार लिख्, चल्, वद्, हस् आदि धातुओं के रूप चलते हैं।

पा-पीना

लट्लकार (वर्तमान काल)

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष मध्यम पुरुष उत्तम पुरुष	पिबति पिबसि पिबामि	पिबत: पिबथ: पिबाव:	पिबन्ति पिबथ पिबाम:

लङ् लकार (भूतकाल)

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष मध्यम पुरुष उत्तम पुरुष	अपिबत् अपिब: अपिबम्	अपिबताम् अपिबतम् अपिबाव	अपिबन् अपिबत अपिबाम

अस्- होना

लट्लकार (वर्तमान काल)

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष मध्यम पुरुष उत्तम पुरुष	अस्ति असि अस्मि	स्त: स्थ: स्व:	सन्ति स्थ स्म:

लङ् लकार (भूतकाल)

पुरुष	एकवचन	द्विवचन	बहुवचन

प्रथम पुरुष	आसीत्	आस्ताम्	आसन्
मध्यम पुरुष	आसीः	आस्तम्	आस्त
उत्तम पुरुष	आसम्	आस्व	आस्म

सम्बन्ध जोड़ो

वनम्	तालं, वृक्षः, मिष्टान्नं
विद्यालयः	पुस्तकं, गच्छति, शुकः
जलम्	मेघः, सागरः, अग्निः
छात्रः	क्रीडा, विद्यालयः, तपः
खगः	वृक्षः, नदी, आकाशः
सिंहः	मधुरः, गर्जति, नृपः
दर्पणः	मुखः, गजः, छुरिका
प्रातः	शयनम्, स्नानम्, अध्ययनम्
पुष्पम्	पत्रम्, नौका, बालिका

ऊपर एक ओर कुछ शब्द दिए हैं। दूसरी ओर तीन तीन अन्य शब्द दिए हैं। इनमें से जो शब्द पहले दिए गए शब्द से सम्बन्धित है, उसके नीचे लकीर खींच दें। अपने सीखे शब्दों से इस सूची को बढ़ाते जायें और सही सम्बन्ध जोड़ते चलें।

राष्ट्रगान

जन–गण–मन अधिनायक, जय हे
भारत–भाग्य विधाता।
पंजाब–सिंध–गुजरात–मराठा–
द्राविड़–उत्कल बंग
विंध्य–हिमाचल–यमुना–गंगा
उच्छल–जलधि तरंग
तव शुभ नामे जागे,
तव शुभ आशिष मांगे,
गाहे तव जय गाथा
जन–गण–मंगल दायक जय हे
भारत–भाग्य विधाता।
जय हे, जय हे, जय हे,
जय जय जय जय हे!

Table of Contents